International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 152-155
© 2026 IJMH
www.themultijournal.com

Received: 10-03-2026
Accepted: 03-04-2026
Publish : 04-04-2026

**विष्णुपदसाहु:**
विद्यावारिधिः शोधछात्रः,
न्यायदर्शनविभागः,
श्री जगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

**Correspondence:**
**विष्णुपदसाहु:**
विद्यावारिधिः शोधछात्रः,
न्यायदर्शनविभागः,
श्री जगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

# श्रीमद्भगवद्गीतायां मूल्यबोधशिक्षा

**विष्णुपदसाहु:**

अहिंसायाः शान्त्याः च तीर्थभूमिः वर्तते भारतवर्ष एव। अस्याम् एव पूण्यभूमौ संस्कृताधारितग्रन्थेषु अन्यतमा श्रीमद्भगवद्गीता। संस्कृतवाङ्मये श्रीमद्भगवद्गीता रत्नप्रभा इव वर्तते। सर्वोपनिषत्सारभूता श्रीमद्भगवद्गीता संस्कृतशात्रेषु मुख्यस्थानमधिकरोतीति नास्ति विवुधानां वैमत्यम्। विविधानां धर्मपिपासूनां नैष्ठिकसाधकानाञ्च हृदयसिंहासनेषु स्थिरमासनमधिकृतमनेन शास्त्रेण इति वक्तुं शक्नुमः। अतः एव उक्तम् -

**"सर्वोपनिषदो गावो दोग्धा गोपालनन्दन:।**
**पार्थो वत्स: सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥"**[१]

वस्तुतः मानवजीवनस्य परमलक्ष्यलाभोपायः सम्यग्रुपेण प्रदर्शितः अस्याम् इति भगवद्गीता। गीता एषा अमृतस्वरूपा एव।

आध्यात्मिकविषयं विहाय मूल्यबोधशिक्षाऽपि गीताशास्त्रात् शिक्षितुं शक्यते, इति अवश्यमेव वक्तुं पार्य्यते। विश्लेषणीदृष्टिनिपातेन तस्मिन् विषये द्रष्टुं शक्यते-

गीतायां तत्र प्रथमोऽध्याये पठ्यते यत्र अर्जुन उवाच -

**न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे।**
**न कक्षे विजयं कृष्ण न च राज्यं सुखानि च।।**[२]

अधुना प्रायेण दृश्यते प्रात्यहिकवार्तायां श्रूयते च पारस्परिकासहिष्णुताजनितं वधवन्धनादिकं प्रत्यहमेव प्रचलति। अत्र अर्जुनस्योक्तिरस्माभिरवधेया - 'स्वजनं हि कथं हत्वा सुखिनः स्याम माधव'इति। सर्वेषु भूतेषु ऐक्यभावं भवेत्। अतः उपनिषदि उक्तम् -

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥**[३]

परस्परैः सह व्यवहारं कथं भवेत् तदपि उक्तम् गीतायाम्। विद्वज्जनानां कर्मव्यवहारः निष्कामभावेन लोकसंग्रहाय एव भवेत्।

**'कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुलोकसंग्रहम्।'**[४]

यतो हि ज्ञानमेव अस्माकं व्यवहारस्य हेतुः वर्तते, अतएव हेतुमूले ज्ञानस्य विषये तर्कसंग्रहे उक्तं यत् -

**'सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानम्।'**[५]

अधुना शिक्षाव्यवस्थायां वयं पश्यामः छात्रेषु श्रद्धाभावः नास्ति। अतः यः ज्ञानं प्रासुकामः तस्य सर्वप्रथमं गुरौ श्रद्धा आवश्यिकी- इति गीतायाः सन्देशः -

**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥**[६]

श्वेताश्वतरोपनिषदि गुरोर्महत्त्वमेवं प्रतिपादयति -

**यस्य देवे परा भक्तिः यथा देवे तथा गुरौ।**[७]

ज्ञानं प्राप्तर्थं न तु अत्यधिकं शासनं करणीयं न तु अधिकं जागरणमेव। द्वयोः उचिता स्थितिः यत्र भविष्यति तत्रैव ज्ञानमार्गः सरलः भविष्यति। अतः गीतायाम् उक्तम् -

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**

**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥**[८]

यतो हि अत्यल्पत्वकारणात् शरीरे पोषणाभावः भवति। पोषणाभावेन अस्माकं शारीरिकी मानसिकी च कार्यक्षमता न्यूना भवति। येन ज्ञानप्राप्तौ बाधा उत्पन्ना भवति। यथा शतपथब्राह्मणेऽपि उक्तम्-

**यदु ह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति।**
**यद्भूयो हिनस्ति तद्यत्कथनीयो न तदवति॥**[९]

द्वितीयेऽध्याये शोकसंविग्नमानसं दुर्वलहृदयम् अर्जुनमादिशति श्रीभगवान्-

**क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते।**
**क्षुद्रं हृदयदौर्वल्यं त्यक्त्वोत्तिष्ठ परन्तप॥**[१०]

अधुना प्रायेण दृश्यते यत् बहवः मानवाः विशेषतः युवजनाः कर्तव्यकर्मसूत्साहहीना दुर्वला वा। परन्तु समाजजीवने राष्ट्रीयजीवने च आध्यात्मिकसाधने सर्वत्रैव पौरुषस्य प्रकाशः एकान्तमेवावश्यकः। तत्रेयं भगवदुक्तिरस्मान् वाक्कशाघातेन उद्दीपयतितरां - क्लैब्यं मास्म गमः इत्यादिना। अतो हृदयदौर्वल्यम् अस्माभिः सर्वथा परित्यज्यमिति नास्ति लेशतोऽपि सन्देहावकाशः। ततश्च प्रणिधानयोग्यं हि भगवद्वचनं-

**न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥**[११]

इत्यत्र आत्मा अजरोऽमरोऽविनाशी नित्यबुद्धमुक्तस्वभावः सच्चिदानन्दस्वरूप इति यदुपदिष्टं तेन कं कं हन्ति, केन को वा हन्यते इति विचिन्त्य चास्माकं मध्ये यद् वादविसम्वादवधवन्धनादिकं चलति तत्तु अविलम्वेनैव स्तव्धं स्यात्। किञ्च - 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च' - इत्यत्र पुनः पुनः जन्ममरणचक्रावर्तिता वयं नितरां कष्टमनुभवाम इत्यपि स्मारं स्मारं परमार्थलाभाय सचेष्टा भवेम वयम्। कर्त्तव्यकर्मसु निष्ठाभावः साफल्यलाभे संकल्पाभावो यदस्मासु लक्ष्यते तत्र तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चय इति भगवद्वचनाद् दृढसंकल्पा निष्ठावन्तो भवामो वयमिति शिक्षा लभ्यते। किञ्च कर्मानुष्ठाने क्वचित् साफल्यं क्वचिद्वा वैफल्यं लभ्यते। तत्र साफल्ये उल्लासः वैफल्ये च दीर्घश्वासः इति द्वयोरेकोऽपि नोपादेय इति यथायथमेवादिष्टं भगवता -

**सुखे दुःखे समे कृत्वा लाभालाभौ जयाजयौ।**
**ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥**[१२]

पुनरप्युक्तं -

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥**[१३]

अज्ञानजनितकामनावासना नितरां पीडयति अस्मान् अस्मत्कृते दुर्भोगमावहति वा। किञ्च कर्मानुष्ठानात् प्रागेव तत् फललाभचिन्ता कर्तव्यकर्मणां यथायथमनुष्ठाने वाधास्वरूपा। सुष्टुकर्मसम्पादनमेवास्माकं मुख्यं लक्ष्यं स्यात् न तु फललाभेप्सा। अतः एवोक्तम् -

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भुः मा ते सङ्गोऽस्त्वकर्मणि॥**[१४]

यदुपदिष्टं भगवता अर्जुनमुपलक्ष्य सर्वानस्मान् प्रति तत्तु सर्वथास्माभिरनुसरणीयम्। तथा च फलासक्तिं विहाय निष्कामो निरहङ्कारो भूत्वा कर्तव्यकर्मसम्पादनेनैव परमलक्ष्यलाभस्य पन्थाः प्रशस्तो भवतीति शास्त्रस्याभिमतम् इत्युक्तम् -

**तस्मादसक्तः सततं कार्य्यं कर्म समाचर।**
**असक्तो ह्याचरन् कर्म परमाप्नोति पुरुषः॥**[१५]

प्रायेण मानवाः दुःखेषु उद्विग्नाः सुखेषु चोल्लासिता भवन्ति। ततश्चास्माकम् उद्वेगदुश्चिन्तादिकं नित्यमेव वर्धतेतराम्, तेन चाकाले मारणरोगाक्रान्ता वयं पञ्चत्वं प्राप्नुयाम इति युक्तमेव कथितं भगवता-

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥**[१६]

वस्तुतस्तु मुनिवत् जीवनयापनमेव परमशान्तिलाभस्य मूलमिति वक्तुं शक्यते। पार्थिवभोग्यविषयेषु अधिकासक्तिरेव दुःखस्य निदानम् ध्वंसकारणमिति। अतः उक्तम् -

**ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते॥**
**क्रोधाद्भवति सन्मोहः सन्मोहात् स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥**[१७]

अत्र यदुक्तं तत्तु शान्तिलाभार्थमन्यत्रोपदिष्टम् -

**विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।**
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥**[१८]

किञ्च भोग्यविषयादिकानां मनसा स्मरणमपि लक्ष्यलाभे वाधकमित्युक्तम् -

**कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।**
**इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते॥**[१९]

गृहस्थानां साधारणानां कृतेऽपि मूल्यबोधशिक्षणमुपदिष्टं भगवता -

**नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।**
**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।**
**शरीरयात्रापि च ते न प्रसिध्येदकर्मणः॥**[२०]

किञ्च ईश्वरप्रीत्यर्थं निष्कामभावेन लोककल्याणार्थं कर्मानुष्ठानं यज्ञनाम्ना अभिधीयते। तद् भिन्नं कर्मानुष्ठानं वन्धनकारणं भवति। अतः यज्ञभावेन सर्वं करणीयम्। तथा च प्रात्यहिकजीवने अतिथिअभ्यागतानां कृते अन्नयाचकानां कृते गृहस्थैः पाकः कर्त्तव्यः अन्यथा केवलम् आत्मप्रयोजनार्थं पाककार्ये पापभक्षणं भविष्यति इत्याह -

**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्विषैः।**
**भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्॥**[२१]

स्वस्ववर्णाश्रमधर्माणां यथायथमनुष्ठानं सर्वेषां कर्त्तव्यम्। यद्यपि तदनेकैः दूष्यते इत्यत्रास्माभिः भगवदुपदेशः अनुसरणीयः -

**श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।**
**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥**[२२]

अन्यत्राप्युक्तं -

**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।**
**यद्वा-स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥**[२३]

गीतायाः चतुर्थेऽध्याये - श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः - इति भगवदुक्तिं प्रति अवधानं देयमस्माभिः। तथाहि पाठ्यविषये छात्राणां पाठकवर्गानां वा श्रद्धाहीनता, किंच कर्त्तव्यकर्मसु अश्रद्धा निष्ठाभावो वा प्रायेण संलक्ष्यते। परन्तु सर्वमेव श्रद्धया करणीयमिति भगवद्वाणी सर्वथा अनुसरणीया, तेन च साफल्यमपि सुलभं स्यात्।

सप्तदशेऽध्याये अप्युक्तं -

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत्।**
**असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह॥**[२४]

तथा हि जिज्ञासा-समाधानार्थं ज्ञानलाभाय वा भगवदुपदेश शिरोधार्य्यः -

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥**[२५]

ज्ञेयविषये श्रद्धा जिज्ञासा च तथा गुरुसेवा त्रितयमेव ज्ञान-लाभस्यमूलम्। प्रायेण मनुष्य आत्मानं कर्तारं मन्यते। परन्तु सर्वमेव प्रकृतिवशाच्चलति यद्वा भगवदिच्छया सर्वं संघटते इति भगवद्वचनं स्मरणीयम् -

**प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।**
**अहङ्कारविमूढात्मा कर्ताहमिति मन्यते।।**[२६]

अतोऽस्मत् कृते 'निमित्तमात्रं भव' इत्येतद् विहाय नास्त्युपायः। तेन च अहङ्कार जनित संसारवन्धनादेर्मुक्तिं लब्धुं शक्यते। इह खलु जगति सर्वदा अन्यापेक्षया अधिकलाभार्थं सर्वे प्रयतन्ते। परन्तु ईश्वरलाभापेक्षया श्रेष्ठः लाभः कश्चिदपि नास्तीति भगवद्वाक्यं स्मरणीयमित्याह -

**यंलव्धा चापरं लाभं मन्यते नाधिकंस्ततः।**
**यस्मिंस्थितो न दुःखेन गुरुणापि विचाल्यते॥**[२७]

क्रमोन्नतिरेवास्माकमभीष्टम्। आकारेण मनुष्योऽपि तस्मिन् विद्यते पशुभावः। सर्वेषां प्रचेष्टा तथैव भवेद् येन पशुभावात् मनुष्यत्वं, मनुष्यभावात् देवत्वं तथा ब्रह्मत्वं लभ्येत। तेन च षोड़शाध्याये दैवी सम्पल्लाभार्थं यतितव्यम् इत्याह अभयं सत्त्वसंशुद्धिरित्यादि यतः 'दैवी सम्पद्विमोक्षाय' भवतीतुक्त्यम्। तद्देवभावलाभाय क्रमेण तमोगुणं रजोगुणं चातिक्रम्य सत्त्वगुणलाभाय यत्नः कर्त्तव्यः। ततश्च त्रिगुणातीतो भवितुं युक्तम्। एतत् कृते च कामक्रोधलोभानां परित्यागः सर्वथा कर्तव्य इत्याह -

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।**
**कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत्।।**[२८]

किञ्चात्र उल्लेख्यं यत् कामादित्यागे अशक्तानां कृते 'धर्माविरुद्धः कामोऽस्मि' इति भगवदुक्त्या धर्मविरोधिकामसेवनं कथमपि चलिष्यतीति।

किञ्च देवभावलाभार्थं कायिक-वाचिक-मानसिक-तपस्यानां यद्विवरणं लभ्यते तेनाप्यस्ति प्रयोजनं मूल्यबोधशिक्षायाम्। अत उक्तम् -

**देव द्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**
**ब्रह्मचर्य्यमहिंसा च शारीरं तपः उच्यते॥**
**अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।**
**स्वाध्यायाभ्यसनञ्चैव वाग्मयं तप उच्यते॥**
**मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।**
**भावसंशुद्धिरित्येतत् तपो मानसमुचते॥**[२९]

एवम्विधो मनुष्यव्यवहारो हि काङ्क्षणीय इत्युक्तं पद्मपुराणे -

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥**[३०]

किञ्च दानादिविषयेऽपि भगवदुपदेशः शिरोधार्य्यः -

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**
**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥**[३१]

तेन तामसिक राजसिकादीनां हेयमिति परित्यज्यम्। तथा च वर्तमानकाले यथेच्छम् आहारादिकं गृह्यते मनुष्यैः। परन्तु आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिरित्यादिवचनात् सात्त्विकाहार एवोपादेयः हेयश्च तद्व्यतिरिक्तं इत्युक्तं -

**आयुः सत्त्ववलारोग्यसुखप्रीतिविवर्द्धनाः।**
**रस्याः स्निग्धाः स्थिरा हृद्या अहाराः सात्त्विकप्रियाः॥**[३२]

शेषतः, ईश्वरलाभो ब्रह्मप्राप्तिर्वा मनुष्याणां चरमं लक्ष्यमिति तत्कृते कर्मयोग-राजयोग-भक्तियोग-ज्ञानयोगानां समन्वयसाधनं साधकानां कर्तव्यम्, तथापि कलौ नारदीया भक्तिरेवावलम्वनीया- इति श्रीरामकृष्णमतानुसारेण भगवद्वचनं सर्वथा अनुसरणीयम्- सर्वदा भगवत्प्रीत्यर्थं ईश्वरार्पणबुद्ध्या करणीयं सर्वमित्याह -

**यत् करोषि यदश्मासि यज्जुहोषि ददासि यत्।**
**यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥**[३३]

किञ्च, अनन्यमना नित्याभियुक्तः शरणागतो भक्तो हि भवति मोक्षलाभाय योग्य इत्याह -

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते।**
**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।**[३४]

अपि च सर्वगुह्यतमं भगवद्वचनं सर्वथा पालनीयम्-

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥**[३५]

**पादटीकाः -**

१. मङ्गलाचरणम्
२. गीता- १/३१
३. ईश.उप.नि.- ६
४. गीता-३/२५
५. तर्कसंग्रहः - बुद्धिलक्षणम्
६. गीता - ४/३९
७. श्वे.उ.नि. - ६/२३
८. गीता - ६/१७
९. शत.ब्रा. - ९/२/१/२
१०. गीता - २/३
११. गीता - २/२०

१२. गीता - २/३८

१३. गीता - २/४८

१४. गीता - २/४७

१५. गीता - ३/१९

१६. गीता - २/५६

१७. गीता - २/६२-६३

१८. गीता - २/७१

१९. गीता - ३/६

२०. गीता - ३/८

२१. गीता - ३/१३

२२. गीता - ३/३५

२३. गीता – १८/४५-४६

२४. गीता - १७/२८

२५. गीता - ४/३४

२६. गीता - ३/२७

२७. गीता - ६/२२

२८. गीता - १६/२१

२९. गीता - १७/१४-१६

३०. पद्मपुराणम्,सृष्टिखण्ड: १९/३५७

३१. गीता - १७/२०

३२. गीता - १७/१८

३३. गीता - ९/२७

३४. गीता - ९/२२

३५. गीता - १८/६६

**सहायकग्रन्थावली-**

१.ईशादि नौ उपनिषद्, गीताप्रेस, गोरक्षपुरम्, सं. २०६८

२.तर्कसंग्रहः, गोविन्दाचार्यः, चौखम्बा सुरभारती प्रकाशन, सं. २०१७

३.पद्मपुराणम् चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, २०१५

४.श्रीमद्भगवद्गीता , स्वामी रामसुखदास, गीताप्रेस, गोरक्षपुरम्, २०१७

५.श्रीमद्भगवद्गीता, भाग-२, मदनमोहन अग्रवाल, दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान, २०१०

६.श्रीवाजसनेयी-माध्यन्दिन-शतपथब्राह्मणम्, प्रथमो भागः, नवदेहली, राष्ट्रीयसंस्कृतसंस्थानम्, २००२

७.श्वेताश्वतरोपनिषद् सानुवाद शाङ्करभाष्यसहित, द्वाविंशतिसंस्करण, गीताप्रेस, गोरखपुर, २०११